श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकोनविंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकोनविंशं दशकम् ॥

## प्राचेतसकथानुवर्णनम्

पृथोस्तु नप्ता पृथुधर्मकर्मठः
    प्राचीनबर्हिर्युवतौ शतद्रुतौ।
प्रचेतसो नाम सुचेतसस्सुता -
    नजीजनत् त्वत्करुणाङ्कुरानिव ॥ **19.1** ॥

पितुः सिसृक्षानिरतस्य शासनात्
    भवत्तपस्याभिरता दशापि ते।
पयोनिधिं पश्चिममेत्य तत्तटे
    सरोवरं सन्ददृशुर्मनोहरम् ॥ **19.2** ॥

तदा भवत्तीर्थमिदं समागतो
    भवो भवत्सेवकदर्शनादृतः।
प्रकाशमासाद्य पुरः प्रचेतसाम्
    उपादिशत् भक्ततमस्तवस्तवम् ॥ **19.3** ॥

स्तवं जपन्तस्तममी जलान्तरे
    भवन्तमासेविषतायुतं समाः।
भवत्सुखास्वादरसादमीष्वियान्
    बभूव कालो ध्रुववन्न शीघ्रता ॥ **19.4** ॥

तपोभिरेषामतिमात्रवर्धिभिः
    स यज्ञहिंसानिरतोऽपि पावितः।

पिताऽपि तेषां गृहयातनारद -
प्रदर्शितात्मा भवदात्मतां ययौ ॥ **19.5** ॥

कृपाबलेनैव पुरः प्रचेतसां
प्रकाशमागाः पतगेन्द्रवाहनः।
विराजि चक्रादिवरायुधांशुभिः
भुजाभिरष्टाभिरुदञ्चितद्युतिः ॥ **19.6** ॥

प्रचेतसां तावदयाचतामपि
त्वमेव कारुण्यभराद्वरानदाः।
भवद्विचिन्ताऽपि शिवाय देहिनां
भवत्वसौ रुद्रनुतिश्च कामदा ॥ **19.7** ॥

अवाप्य कान्तां तनयां महीरुहां
तया रमध्वं दशलक्षवत्सरीम्।
सुतोऽस्तु दक्षो ननु तत्क्षणाच्च मां
प्रयास्यथेति न्यगदो मुदैव तान् ॥ **19.8** ॥

ततश्च ते भूतलरोधिनस्तरून्
क्रुधा दहन्तो द्रुहिणेन वारिताः।
द्रुमैश्च दत्तां तनयामवाप्य तां
त्वदुक्तकालं सुखिनोऽभिरेमिरे ॥ **19.9** ॥

अवाप्य दक्षं च सुतं कृताध्वराः
प्रचेतसो नारदलब्धया धिया।
अवापुरानन्दपदं तथाविध -
स्त्वमीश वातालयनाथ पाहि माम् ॥ **19.10** ॥

॥ इति श्रीमन्नारायणीये एकोनविंशं दशकं समाप्तम् ॥